# Nyāya sūtra

## Goutama Nyāya sūtra

### Chapter 01

#### Sub Chapter 01

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानाम्तत्त्वज्ञानान्निःश्रेयसाधिगमः ।। १ ।। {पदार्थोद्देशसूत्रम्}

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनन्तरा पायातपवर्गः ।। २ ।। {पदार्थोद्देशसूत्रम्}

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ।। ३ ।। {प्रमाणौद्देशसूत्रम्}

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं अव्यपदेश्यं अव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ।। ४ ।। {प्रत्यक्षलक्षणम्}

अथ तत्पूर्वकं त्रिविधं अनुमानं पूर्ववत्शेषवत्सामान्यतोदृष्टं च ।। ५ ।। {अनुमानलक्षणम्}

प्रसिद्धसाधर्म्यात्साध्यसाधनं उपमानम् ।। ६ ।। {उपमानलक्षणम्}

आप्तोपदेशः शब्दः ।। ७ ।। {शब्दलक्षणम्}

सः द्विविधः दृष्टादृष्टार्थत्वात् ।। ८ ।। {शब्दभेदः}

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः तु प्रमेयम् ।। ९ ।। {प्रमेयौद्देशसूत्रम्}

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि आत्मनः लिङ्गं इति ।। १० ।। {आत्मलक्षणम्}

चेष्टेन्द्रियार्थाश्रयः शरीरम् ।। ११ ।। {शरीरलक्षणम्}

घ्राणरसनचक्षुस्त्वक्श्रोत्राणि इन्द्रियाणि भूतेभ्यः ।। १२ ।। {इन्द्रियलक्षणम्}

पृथिवी आपः तेजः वायुः आकाशं इति भूतानि ।। १३ ।। {भूतलक्षणम्}

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणाः तदर्थाः ।। १४ ।।

बुद्धिः उपलब्धिः ज्ञानं इति अनर्थान्तरम् ।। १५ ।। {बुद्धिलक्षणम्}

युगपत्ज्ञानानुत्पत्तिः मनसः लिङ्गम् ।। १६ ।। {मनोलक्षणम्}

प्रवृत्तिः वाग्बुद्धिशरीरारम्भः ।। १७ ।। {प्रवृत्तिलक्षणम्}

प्रवर्त्तनालक्षणाः दोषाः ।। १८ ।। {दोषलक्षणम्}

पुनरुत्पत्तिः प्रेत्यभावः ।। १९ ।। {प्रेत्यभावलक्षणम्}

प्रवृत्तिदोषजनितः अर्थः फलम् ।। २० ।। {फललक्षणम्}

बाधनालक्षणं दुःखम् ।। २१ ।। {दुःखलक्षणम्}

तदत्यन्तविमोक्षः अपवर्गः ।। २२ ।। {अपवर्गलक्षणम्}

समानानेकधर्मोपपत्तेः विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातः च विशेषापेक्षः विमर्शः संशयः ।। २३ ।। {संशयलक्षणम्}

यं अर्थं अधिकृत्य प्रवर्तते तत्प्रयोजनम् ।। २४ ।। {प्रयोजनलक्षणम्}

लौकिकपरीक्षकाणां यस्मिनर्थे बुद्धिसाम्यं सः दृष्टान्तः ।। २५ ।। {दृष्टान्तलक्षणम्}

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ।। २६ ।। {अभ्युपगमसिद्धान्तलक्षणम्}

सः चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ।। २७ ।। {तन्त्रभेदौद्देशसूत्रम्}

सर्वतन्त्राविरुद्धः तन्त्रे अधिकृतः अर्थः सर्वतन्त्रसिद्धान्तः ।। २८ ।। {सर्वतन्त्रसिद्धान्तलक्षणम्}

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ।। २९ ।। {प्रतितन्त्रसिद्धान्तलक्षणम्}

यत्सिद्धौ अन्यप्रकरणसिद्धिः सः अधिकरणसिद्धान्तः ।। ३० ।। {अधिकरणसिद्धान्तलक्षणम्}

अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणं अभ्युपगमसिद्धान्तः ।। ३१ ।। {अभ्युपगमसिद्धान्तलक्षणम्}

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि अवयवाः ।। ३२ ।। {अवयवौद्देशसूत्रम्}

साध्यनिर्देशः प्रतिज्ञा ।। ३३ ।। {प्रतिज्ञालक्षणम्}

उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ।। ३४ ।। {हेतुलक्षणम्}

तथा वैधर्म्यात् ।। ३५ ।। {हेतुलक्षणम्}

साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्तः उदाहरणम् ।। ३६ ।। {उदाहरणलक्षणम्}

तद्विपर्ययात्वा विपरीतम् ।। ३७ ।। {उदाहरणलक्षणम्}

उदाहरणापेक्षः तथा इति उपसंहारः न तथा इति वा साध्यस्य उपनयः ।। ३८ ।। {उपनयलक्षणम्}

हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम् ।। ३९ ।। {निगमनलक्षणम्}

अविज्ञाततत्वे अर्थे कारणोपपत्तितः तत्वज्ञानार्थं उहः तर्कः ।। ४० ।। {तर्कलक्षणम्}

विमृश्य पक्षप्रतिपक्षाभ्यां अर्थावधारणं निर्णयः ।। ४१ ।। {निर्णयलक्षणम्}

Sub Chapter 02

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः वादः ।। १ ।। {वादलक्षणम्}

यथोक्तोपपन्नः छलजातिनिग्रहस्थानसाधनोपालम्भः जल्पः ।। २ ।। {जल्पलक्षणम्}

सः प्रतिपक्षस्थापनाहीनः वितण्डा ।। ३ ।। {वितण्डालक्षणम्}

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीताः हेत्वाभासाः ।। ४ ।। {हेत्वाभासौद्देशसूत्रम्}

अनैकान्तिकः सव्यभिचारः ।। ५ ।। {सव्यभिचारलक्षणम्}

सिद्धान्तं अभ्युपेत्य तद्विरोधी विरुद्धः ।। ६ ।। {विरुद्धलक्षणम्}

यस्मात्प्रकरणचिन्ता सः निर्णयार्थमपदिष्टः प्रकरणसमः ।। ७ ।। {प्रकरणसमलक्षणम्}

साध्याविशिष्टः साध्यत्वात्साध्यसमः ।। ८ ।। {साध्यसमलक्षणम्}

कालात्ययापदिष्टः कालातीतः ।। ९ ।। {कालातीतलक्षणम्}

वचनविघातः अर्थविकल्पोपपत्त्या छलम् ।। १० ।। {छललक्षणम्}

तत्त्रिविधं वाक्छलं सामान्यच्छलं उपचारच्छलं च इति ।। ११ ।। {छलभेदौद्देशसूत्रम्}

अविशेषाभिहिते अर्थे वक्तुः अभिप्रायातर्थान्तरकल्पना वाक्छलम् ।। १२ ।। {वाक्छललक्षणम्}

सम्भवतः अर्थस्य अतिसामान्ययोगातसम्भूतार्थकल्पना सामान्यच्छलम् ।। १३ ।। {सामान्यच्छललक्षणम्}

धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेधः उपचारच्छलम् ।। १४ ।। {उपचारच्छललक्षणम्}

वाक्छलं एव उपचारच्छलं ततविशेषात् ।। १५ ।। {उपचारच्छलपूर्वपक्षलक्षणम्}

न ततर्थान्तरभावात् ।। १६ ।। {उपचारच्छललक्षणम्}

अविशेषे वा किञ्चित्साधर्म्यातेकच्छलप्रसङ्गः ।। १७ ।। {उपचारच्छललक्षणम्}

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ।। १८ ।। {जातिलक्षणम्}

विप्रतिपत्तिः अप्रतिपत्तिः च निग्रहस्थानम् ।। १९ ।। {निग्रहस्थानलक्षणम्}

तद्विकल्पात्जातिनिग्रहस्थानबहूत्वम् ।। २० ।। {निग्रहस्थानबहूत्वसूत्रम्}

## Chapter 02

### Sub Chapter 01

समानानेकधर्माध्यवसायातन्यतरधर्माध्यवसायात्वा न संशयः ।। १ ।। {संशय}

विप्रत्तिपत्त्यव्यवस्थाध्यवसायात्च ।। २ ।। {संशय}

विप्रत्तिपत्तौ च संप्रत्तिपत्तेः ।। ३ ।। {संशय}

अव्यवस्था आत्मनि व्यवस्थितत्वात्च अव्यवस्थायाः ।। ४ ।। {संशय}

तथा अत्यन्तसंशयः तद्धर्मसातत्योपपत्तेः ।। ५ ।। {संशय}

यथोक्ताध्यवसायातेव तद्विशेषापेक्षात्संशये न असंशयः न अत्यन्तसंशयः वा ।। ६ ।। {संशय}

यत्र संशयः तत्र एवं उत्तरोत्तरप्रसङ्गः ।। ७ ।। {संशय}

प्रत्यक्षादीनां अप्रामाण्यं त्रैकाल्यासिद्धेः ।। ८ ।। {पूर्वपक्षसूत्रम्}

पूर्वं हि प्रमाणसिद्धौ न इन्द्रियार्थसन्निकर्षात्प्रत्यक्षोत्पत्तिः ।। ९ ।। {पूर्वपक्षसूत्रम्}

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ।। १० ।। {पूर्वपक्षसूत्रम्}

युगपत्सिद्धौ प्रत्यर्थनियतत्वात्क्रमवृत्तित्वाभावः बुद्धीनाम् ।। ११ ।। {पूर्वपक्षसूत्रम्}

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ।। १२ ।। {पूर्वपक्षसूत्रम्}

सर्वप्रमाणप्रतिषेधात्च प्रतिषेधानुपपत्तिः ।। १३ ।। {पूर्वपक्षसूत्रम्}

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ।। १४ ।। {पूर्वपक्षसूत्रम्}

त्रैकाल्याप्रतिषेधः च शब्दातातोद्यसिद्धिवत्तत्सिद्धेः ।। १५ ।। {पूर्वपक्षसूत्रम्}

प्रमेया च तुलाप्रामाण्यवत् ।। १६ ।। {पूर्वपक्षसूत्रम्}

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ।। १७ ।। {पूर्वपक्षसूत्रम्}

तद्विनिवृत्तेः वा प्रमाणसिद्धिवत्प्रमेयसिद्धिः ।। १८ ।। {पूर्वपक्षसूत्रम्}

न, प्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः ।। १९ ।। {सिद्धान्तलक्षणम्}

क्वचिन्निवृत्तिदर्शनातनिवृत्तिदर्शनात्च क्वचितनेकान्तः ।। २० ।। {सिद्धान्तलक्षणम्}

प्रत्यक्षलक्षणानुपपत्तिः असमग्रवचनात् ।। २१ ।। {प्रत्यक्षलक्षण} {प्रत्यक्षलक्षणपरीक्षा}

न आत्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ।। २२ ।।

दिग्देशकालाकाशेषु अपि एवं प्रसङ्गः ।। २३ ।।

ज्ञानलिङ्गत्वातात्मनः न अनवरोधः ।। २४ ।। {प्रत्यक्षलक्षणसिद्धान्तसूत्रम्}

तदयौगपद्यलिङ्गत्वात्च न मनसः ।। २५ ।। {प्रत्यक्षलक्षणसिद्धान्तसूत्र}

प्रत्यक्षनिमित्तत्वात्च इन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् ।। २६ ।। {प्रत्यक्षलक्षणसिद्धान्तसूत्र}

सुप्तव्यासक्तमनसां च इन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ।। २७ ।। {प्रत्यक्षलक्षणसिद्धान्तसूत्र}

तैः च अपदेशः ज्ञानविशेषाणाम् ।। २८ ।। {प्रत्यक्षलक्षणसिद्धान्तसूत्र}

व्याहतत्वातहेतुः ।। २९ ।। {प्रत्यक्षलक्षणसिद्धान्तसूत्र}

न अर्थविशेषप्राबल्यात् ।। ३० ।। {प्रत्यक्षलक्षणसिद्धान्तसूत्र}

प्रत्यक्षं अनुमानं एकदेशग्रहणातुपलब्धेः ।। ३१ ।। {पूर्वपक्षसूत्र}

न, प्रत्यक्षेण यावत्तावतपि उपलम्भात् ।। ३२ ।। {सिद्धान्तसूत्र}

न चैकदेशोपलब्धिरवयविसद्भावात् ।। ३३ ।। {सिद्धान्तसूत्र}

साध्यत्वातवयविनि सन्देहः ।। ३४ ।। {पूर्वपक्षसूत्र}

सर्वाग्रहणं अवयव्यसिद्धेः ।। ३५ ।। {सिद्धान्तसूत्र}

धारणाकर्षणोपपत्तेः च ।। ३६ ।। {सिद्धान्तसूत्र}

सेनावनवत्ग्रहणं इति चेन्न अतीन्द्रियत्वातणूनाम् ।। ३७ ।। {सिद्धान्तसूत्र}

रोधोपघातसादृश्येभ्यः व्यभिचारातनुमानं अप्रमाणम् ।। ३८ ।। {पूर्वपक्षसूत्र}

न, एकदेशत्राससादृश्येभ्यः अर्थान्तरभावात् ।। ३९ ।। {सिद्धान्तसूत्र}

वर्तमानाभावः, पततः पतितपतितव्यकालोपपत्तेः ।। ४० ।। {पूर्वपक्षसूत्र}

तयोः अपि अभावः वर्तमानाभावे, तदपेक्षत्वात् ।। ४१ ।। {सिद्धान्तसूत्र}

न अतीतानागतयोः इतरेतरापेक्षा सिद्धिः ।। ४२ ।। {सिद्धान्तसूत्र}

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ।। ४३ ।। {सिद्धान्तसूत्र}

कृतताकर्तव्यतोपपत्तेः तु उभयथा ग्रहणम् ।। ४४ ।। {सिद्धान्तसूत्र}

अत्यन्तप्रायैकदेशसाधर्म्यातुपमानासिद्धिः ।। ४५ ।। {सिद्धान्तसूत्र}

प्रसिद्धसाधर्म्यातुपमानसिद्धेः यथोक्तदोषानुपपत्तिः ।। ४६ ।। {पूर्वपक्षसूत्र}

प्रत्यक्षेण अप्रत्यक्षसिद्धेः ।। ४७ ।। {सिद्धान्तसूत्र}

न अप्रत्यक्षे गवये प्रमाणार्थं उपमानस्य पश्यामः ।। ४८ ।। {सिद्धान्तसूत्र}

तथा इति उपसंहारातुपमानसिद्धेः न अविशेषः ।। ४९ ।। {सिद्धान्तसूत्र}

शब्दः अनुमानं अर्थस्य अनुपलब्धेः अनुमेयत्वात् ।। ५० ।। {पूर्वपक्षसूत्र}

उपलब्धेः अद्विप्रवृत्तित्वात् ।। ५१ ।। {पूर्वपक्षसूत्र}

सम्बन्धात्च ।। ५२ ।। {पूर्वपक्षसूत्र}

आप्तोपदेशसामर्थ्यात्शब्दातर्थसम्प्रत्ययः ।। ५३ ।। {सिद्धान्तसूत्र}

पूरणप्रदाहपाटनानुपलब्धेः च सम्बन्धाभावः ।। ५४ ।। {सिद्धान्तसूत्र}

शब्दार्थव्यवस्थानातप्रतिषेधः ।। ५५ ।। {सिद्धान्तसूत्र}

न, सामयिकत्वात्शब्दार्थसम्प्रत्ययस्य ।। ५६ ।। {सिद्धान्तसूत्र}

जातिविशेषे च अनियमात् ।। ५७ ।। {सिद्धान्तसूत्र}

तदप्रामाण्यं अनृतव्याघातपुनरुक्तदोषेभ्यः ।। ५८ ।। {सिद्धान्तसूत्र}

न, कर्मकर्तृसाधनवैगुण्यात् ।। ५९ ।। {सिद्धान्तसूत्र}

अभ्युपेत्य कालभेदे दोषवचनात् ।। ६० ।। {सिद्धान्तसूत्र}
अनुवादोपपत्तेः च ।। ६१ ।। {सिद्धान्तसूत्र}
वाक्यविभागस्य च अर्थग्रहणात् ।। ६२ ।। {सिद्धान्तसूत्र}
विध्यर्थवादानुवादवचनविनियोगात् ।। ६३ ।। {सिद्धान्तसूत्र}
विधिः विधायकः ।। ६४ ।। {सिद्धान्तसूत्र}

स्तुतिः निन्दा परकृतिः पुराकल्पः इति अर्थवादः ।। ६५ ।। {सिद्धान्तसूत्र}
विधिविहितस्य अनुवचनं अनुवादः ।। ६६ ।। {अर्थवाद}

न अनुवादपुनरुक्तयोः विशेषः, शब्दाभ्यासोपपत्तेः ।। ६७ ।। {सिद्धान्तसूत्र}
शीघ्रतरगमनोपदेशवतभ्यासात्न अविशेषः ।। ६८ ।। {सिद्धान्तसूत्र}

मन्त्रायुर्वेदप्रामाण्यवत्च तत्प्रामाण्यम्, आप्तप्रामाण्यात् ।। ६९ ।। {सिद्धान्तसूत्र}

## Sub Chapter 02

न चतुष्ट्वम्, ऐतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ।। १ ।। {पूर्वपक्षसूत्र}
शब्दे ऐतिह्यानर्थान्तरभावातनुमाने अर्थापत्तिसम्भवाभावानर्थान्तर भावात्च अप्रतिषेधः ।। २ ।। {सिद्धान्तसूत्र}

अर्थापत्तिः अप्रमाणं अनैकान्तिकत्वात् ।। ३ ।। {अर्थापत्तिप्रामाण्यपरीक्षा}
अनर्थापत्तौ अर्थापत्त्यभिमानात् ।। ४ ।। {नानैकान्तिकत्वमर्थापत्तेः}
प्रतिषेधाप्रामाण्यं च अनैकान्तिकत्वात् ।। ५ ।।
तत्प्रामाण्ये वा न अर्थापत्त्यप्रामाण्यम् ।। ६ ।। {सिद्धान्तसूत्र}
न अभावप्रामाण्यं प्रमेयासिद्धेः ।। ७ ।। {पूर्वपक्षसूत्र}

लक्षितेष्वलक्षणलक्षितत्वातलक्षितानां तत्प्रमेयसिद्धेः ।। ८ ।। {उदाहरण सूत्र}

असति अर्थे न अभावः इति चेत्न, अन्यलक्षणोपपत्तेः ।। ९ ।। {सिद्धान्तसूत्र}
तत्सिद्धेः अलक्षितेषु अहेतुः ।। १० ।। {पूर्वपक्षसूत्र}
न, लक्षणावस्थितापेक्षसिद्धेः ।। ११ ।। {सिद्धान्तसूत्र}
प्राकुत्पत्तेः अभावोपपत्तेः च ।। १२ ।। {सिद्धान्तसूत्र}
आदिमत्वातैन्द्रियकत्वात्कृतकवतुपचारात्च ।। १३ ।। {शब्दानित्यत्वप्रतिपादनसूत्र}
न, घटाभावसामान्यनित्यत्वान्नित्येषु अपि अनित्यवतुपचारात्च ।। १४ ।। {सिद्धान्तसूत्र}
तत्त्वभाक्तयोः नानात्वविभागातव्यभिचारः ।। १५ ।। {शब्दानित्यत्वप्रतिपादनसूत्र} {सिद्धान्तसूत्र}
सन्तानानुमानविशेषणात् ।। १६ ।। {शब्दानित्यत्वप्रतिपादनसूत्र} {सिद्धान्तसूत्र}
कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् ।। १७ ।। {शब्दानित्यत्वप्रतिपादनसूत्र} {सिद्धान्तसूत्र}
प्राकुच्चारणातनुपलब्धेः आवरणाद्यनुपलब्धेः च ।। १८ ।। {शब्दानित्यत्वप्रतिपादनसूत्र}
तदनुपलब्धेः अनुपलम्भातावरणोपपत्तिः ।। १९ ।। {शब्दानित्यत्वप्रतिपादनसूत्र}
अनुपलम्भातनुपलब्धिसद्भावात्न आवरणानुपपत्तिः अनुपलम्भात् ।। २० ।। {सिद्धान्तसूत्र}
अनुपलम्भात्मकत्वातनुपलब्धेः अहेतुः ।। २१ ।। {सिद्धान्तसूत्र}
अस्पर्शत्वात् ।। २२ ।। {सिद्धान्तसूत्र}
न, कर्मानित्यत्वात् ।। २३ ।। {सिद्धान्तसूत्र}
न, अणुनित्यत्वात् ।। २४ ।। {सिद्धान्तसूत्र}
सम्प्रदानात् ।। २५ ।। {सिद्धान्तसूत्र}
तदन्तरालानुपलब्धेः अहेतुः ।। २६ ।। {सिद्धान्तसूत्र}
अध्यापनातप्रतिषेधः ।। २७ ।। {सिद्धान्तसूत्र}

उभयोः पक्षयोः अन्यतरस्य अध्यापनातप्रतिषेधः ।। २८ ।। {सिद्धान्तसूत्र}
अभ्यासात् ।। २९ ।। {सिद्धान्तसूत्र}
न अन्यत्वे अपि अभ्यासस्य उपचारात् ।। ३० ।। {सिद्धान्तसूत्र}

अन्यतन्यस्मातनन्यत्वातनन्यतिति अन्यताभावः ।। ३१ ।। {सिद्धान्तसूत्र}

तदभावे न अस्ति अनन्यता, तयोः इतरेतरापेक्षसिद्धेः ।। ३२ ।। {सिद्धान्तसूत्र}

विनाशकारणानुपलब्धेः ।। ३३ ।। {सिद्धान्तसूत्र}
अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ।। ३४ ।। {सिद्धान्तसूत्र}

उपलभ्यमाने च अनुपलब्धेः असत्वातनपदेशः ।। ३५ ।। {सिद्धान्तसूत्र}
पाणिनिमित्तप्रश्लेषात्शब्दाभावे न अनुपलब्धिः ।। ३६ ।। {सिद्धान्तसूत्र}
विनाशकारणानुपलब्धेः च अवस्थाने तन्नित्यत्वप्रसङ्गः ।। ३७ ।। {सिद्धान्तसूत्र}
अस्पर्शत्वातप्रतिषेधः ।। ३८ ।। {सिद्धान्तसूत्र}
विभक्त्यन्तरोपपत्तेः च समासे ।। ३९ ।। {सिद्धान्तसूत्र}
विकारादेशोपदेशात्संशयः ।। ४० ।। {पूर्वपक्षसूत्र}
प्रकृतिविवृद्धौ विकारविवृद्धेः ।। ४१ ।। {सिद्धान्तसूत्र}
न्यूनसमाधिकोपलब्धेः विकाराणां अहेतुः ।। ४२ ।। {सिद्धान्तसूत्र}

द्विविधस्य अपि हेतोः अभावातसाधनं दृष्टान्तः ।। ४३ ।। {उदाहरणसूत्र}
न, अतुल्यप्रकृतीनां विकारविकल्पात् ।। ४४ ।। {सिद्धान्तसूत्र}
द्रव्यविकारवैषम्यवत्वर्णविकारविकलः ।। ४५ ।। {पूर्वपक्षसूत्र}
न, विकारधर्मानुपपत्तेः ।। ४६ ।। {सिद्धान्तसूत्र}
विकारप्राप्तानां अपुनरापत्तेः ।। ४७ ।। {सिद्धान्तसूत्र}
सुवर्णादीनां पुनरापत्तेः अहेतुः ।। ४८ ।। {पूर्वपक्षसूत्र}
न, तद्विकाराणां सुवर्णभावाव्यतिरेकात् ।। ४९ ।। {सिद्धान्तसूत्र}
वर्णत्वाव्यतिरेकात्वर्णविकाराणां अप्रतिषेधः ।। ५० ।। {सिद्धान्तसूत्र}
सामान्यवतो धर्मयोगो न सामान्यस्य ।। ५१ ।। {सिद्धान्तसूत्र}

नित्यत्वे अविकारातनित्यत्वे च अनवस्थानात् ।। ५२ ।। {सिद्धान्तसूत्र}
नित्यानां अतीन्द्रियत्वात्तद्धर्मविकल्पात्च वर्णविकाराणां अप्रतिषेधः ।। ५३ ।। {पूर्वपक्षसूत्र}

अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ।। ५४ ।। {पूर्वपक्षसूत्र}
विकारधर्मित्वे नित्यत्वाभावात्कालान्तरे विकारोपपत्तेः च अप्रतिषेधः ।। ५५ ।। {सिद्धान्तसूत्र}
प्रकृत्यनियमात् ।। ५६ ।। {सिद्धान्तसूत्र}
अनियमे नियमात्न अनियमः ।। ५७ ।। {पूर्वपक्षसूत्र}

नियमानियमविरोधातनियमे नियमात्च अप्रतिषेधः ।। ५८ ।। {सिद्धान्तसूत्र}
गुणान्तरापत्त्युपमर्दह्रासवृद्धिक्षेषेभ्यः तु विकारोपपत्तेः वर्णविकाराः ।। ५९ ।। {सिद्धान्तसूत्र}
ते विभक्त्यन्ताः पदम् ।। ६० ।। {पदलक्षणसूत्रम्}
व्यक्त्याकृतिजातिसन्निधौ उपचारात्संशयः ।। ६१ ।। {पूर्वपक्षसूत्र}
याशब्दसमूहत्यागपरिग्रहसङ्ख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तौ उपचारात्व्यक्तिः ।। ६२ ।। {पूर्वपक्षसूत्र}
न, ततनवस्थानात् ।। ६३ ।। {सिद्धान्तसूत्र}
सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यः ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावे अपि तदुपचारः ।। ६४ ।। {सिद्धान्तसूत्र}
आकृतिः, तदपेक्षत्वात्सत्त्वव्यवस्थानसिद्धेः ।। ६५ ।। {पूर्वपक्षसूत्र}
व्यक्त्याकृतियुक्ते अपि अप्रसङ्गात्प्रोक्षणादिनां मृद्गवके जातिः ।। ६६ ।। {पूर्वपक्षसूत्र}
न, आकृतिव्यक्त्यपेक्षत्वात्जात्यभिव्यक्तेः ।। ६७ ।। {सिद्धान्तसूत्र}
व्यक्त्याकृतिजातयः तु पदार्थः ।। ६८ ।। {सिद्धान्तसूत्र}
व्यक्तिः गुणविशेषाश्रयः मूर्तिः ।। ६९ ।। {सिद्धान्तसूत्र}
आकृतिः जातिलिङ्गाख्या ।। ७० ।। {सिद्धान्तसूत्र}
समानप्रसवात्मिका जातिः ।। ७१ ।। {सिद्धान्तसूत्र}

## Chapter 03

### Sub Chapter 01

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् १
न विषयव्यवस्थानात् २
तद्व्यवस्था-नादेवात्मसद्भावादप्रतिषेधः ३
शरीरदाहे पातकाभावात् ४
तदभावः सात्म-कप्रदाहेऽपि तन्नित्यत्वात् ५
न कार्याश्रयकर्तृवधात् ६
सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ७
नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ८
एकविनाशे द्वितीयाविनाशान्नैकत्वम् ९
अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः १०
दृष्टा-न्तविरोधादप्रतिषेधः ११
इन्द्रियान्तरविकारात् १२
न स्मृतेः स्मर्तव्य-विषयत्वात् १३
तदात्मगुणसद्भावादप्रतिषेधः १४
नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् १५
ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् १६
नियमश्च निरनुमानः १७
पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः १८
पद्मादिषु प्रबोधसम्मीलनविकारवत्तद्विकारः १९

नोष्णशीतवर्षाकालनिमित्त-त्वात्पञ्चात्मकविकाराणाम् २०
प्रेत्याहाराभ्यासकृतात्स्तन्याभिलाषात् २१
अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् २२
नान्यत्र प्रवृत्त्यभावात् २३
वीतरागजन्मादर्शनात् २४
सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः २५
न संकल्पनि-मित्तत्वाद्रागादीनाम् २६
पार्थिवं गुणान्तरोपलब्धेः २७
पार्थिवाप्यतैजसं तद्गुणोपलब्धेः २८
निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् २९
गन्धक्लेद-पाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ३०
श्रुतिप्रामाण्याच्च ३१
कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात्संशयः ३२
महदणुग्रहणात् ३३
रश्म्य-र्थसंनिकर्षविशेषात्तद्ग्रहणम् ३४
तदनुपलब्धेरहेतुः ३५
नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ३६
द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ३७
अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ३८
कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ३९
मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ४०
न रात्रावप्यनुपलब्धेः ४१
वाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितो-ऽनुपलब्धिः ४२
अभिव्यक्तौ चाभिभवात् ४३
नक्तञ्चरनयनरश्मिदर्शनाच्च ४४
अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ४५
कुड्यान्तरिता-नुपलब्धेरप्रतिषेधः ४६
अप्रतिघातात्संनिकर्षोपपत्तिः ४७
आदित्यरश्मेः स्फटिकान्तरेऽपि दाह्येऽविघातात् ४८
नेतरेतरधर्मप्रसङ्गात् ४९
आदर्शो-दकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ५०
दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ५१
स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संश-यः ५२
त्वगव्यतिरेकात् ५३
न युगपदर्थानुपलब्धेः ५४
विप्रतिषेधाच्च न त्वगेका ५५
इन्द्रियार्थपञ्चत्वात् ५६
न तदर्थबहुत्वात् ५७
गन्ध-त्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः ५८
विषयत्वाव्यतिरेकादेकत्वम् ५९
न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ६०
भूतगुणविशेषोपलब्धे-स्तादात्म्यम् ६१
गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ६२
अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ६३
न सर्वगुणानुपलब्धेः ६४
एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ६५
विष्टं ह्यपर-म्परेण ६६
न पार्थिवाप्ययोः प्रत्यक्षत्वात् ६७
पूर्वपूर्वगुणोत्कर्षात्तत्तत्प्रधानम् ६८
तद्व्यवस्थानं तु भूयस्त्वात् ६९
सगुणानामिन्द्रियभावात् ७०
तेनैव तस्याग्रहणाच्च ७१
न शब्दगुणोपलब्धेः ७२
तदुपलब्धिरितरेतरद्रव्य-
गुणवैधर्म्यात् ७३

Sub Chapter 02

कर्माकाशसाधर्म्यात्संशयः १
विषयप्रत्यभिज्ञानात् २
साध्यसमत्वादहेतुः ३
न युगपदग्रहणात् ४
अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ५
क्रमवृत्ति-त्वादयुगपद्ग्रहणम् ६
अप्रत्यभिज्ञानञ्च विषयान्तरव्यासङ्गात् ७
न गत्यभा-वात् ८
स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ९
स्फटिकेऽप्यपरापरो-त्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः १०
नियमहेत्वभावाद्यथादर्शनमभ्यनुज्ञा ११
नोत्पत्तिविनाशकारणोपलब्धेः १२
क्षीरविनाशे कारणानुपलब्धिव-द्दध्युत्पत्तिवच्च तदुपपत्तिः १३
लिङ्गतो ग्रहणान्नानुपलब्धिः १४
न पयसः परिणामगुणान्तरप्रादुर्भावात् १५
व्यूहान्तराद्द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्य-निवृत्तेरनुमानम् १६
क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः १७

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् १८
युगपज्ज्ञेयानुपलब्धेश्च न मनसः १९
तदात्मगुणत्वेऽपि तुल्यम् २०
इन्द्रियैर्मनसः संनिकर्षाभावा-त्तदनुत्पत्तिः २१
नोत्पत्तिकारणानपदेशात् २२
विनाशकारणानुपलब्धेश्चाव-स्थाने तन्नित्यत्वप्रसङ्गः २३
अनित्यत्वग्रहाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् २४
ज्ञानसमवेतात्मप्रदेशसंनिकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः २५
नान्तःशरीरवृत्तित्वान्मनसः २६
साध्यत्वादहेतुः २७
स्मरतः शरीरधार-णोपपत्तेरप्रतिषेधः २८
न तदाशुगतित्वान्मनसः २९
न स्मरणकालानियमात् ३०
आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ३१
व्यासक्तमनसः पाद-व्यथनेन संयोगविशेषेण समानम् ३२
प्रणिधानलिङ्गादिज्ञानानामयुगप-द्भावादयुगपत्स्मरणम् ३३
ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ३४
त-ल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ३५
परश्वादिष्वारम्भनिवृत्ति-दर्शनात् ३६
नियमानियमौ तु तद्विशेषकौ ३७
यथोक्तहेतुत्वात्पारतन्त्र्या-दकृताभ्यागमाच्च न मनसः ३८
परिशेषाद्यथोक्तहेतूपपत्तेश्च ३९
स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ४०
प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरि-
ग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुख-
द्ःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ४१
कर्मानवस्थायि-ग्रहणात् ४२
अव्यक्तग्रहणमनवस्थायित्वाद्विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् ४३
हेतूपादानात्प्रतिषेद्धव्याभ्यनुज्ञा ४४
प्रदीपार्चिःसंतत्यभिव्यक्तग्रहणव-त्तद्ग्रहणम् ४५
द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ४६
यावच्छरीर-भावित्वाद्रूपादीनाम् ४७
न पाकजगुणान्तरोत्पत्तेः ४८
प्रतिद्वन्द्विसिद्धेः पा-कजानामप्रतिषेधः ४९
शरीरव्यापित्वात् ५०
न केशनखादिष्वनुपलब्धेः ५१
त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ५२
शरीरगुणवैधर्म्यात् ५३
न रूपादीनामितरेतरवैधर्म्यात् ५४
ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ५५
ज्ञानायौगपद्यादेकं मनः ५६
न युगपदनेकक्रियोपलब्धेः ५७
अलातचक्र-दर्शनवत्तदुपलब्धिराशुसंचारात् ५८
यथोक्तहेतुत्वाच्चाणु ५९
पूर्वकृतफला-नुबन्धात्तदुत्पत्तिः ६०
भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ६१
न साध्य-समत्वात् ६२
नोत्पत्तिनिमित्तत्वान्मातापित्रोः ६३
तथाहारस्य ६४
प्राप्तौ चानियमात् ६५
शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म ६६
एतेना-नियमः प्रत्युक्तः ६७
तददृष्टकारितमिति चेत्पुनस्तत्प्रसङ्गोऽपवर्गे ६८
मनः-कर्मनिमित्तत्वाच्च संयोगानुच्छेदः ६९
नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ७०
अणुश्यामतानित्यत्ववदेतत्स्यात् ७१
नाकृताभ्यागमप्रसङ्गात् ७२

## Chapter 04

### Sub Chapter 01

प्रवृत्तिर्यथोक्ता १
तथा दोषाः २
तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ३
नैकप्रत्यनीकभावात् ४
व्यभिचारादहेतुः ५
तेषां मोहः पापीयान्नामूढस्ये-तरोत्पत्तेः ६
निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ७
न दोषलक्षणा-वरोधान्मोहस्य ८
निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ९
आत्मनित्यत्वे प्रेत्यभावसिद्धिः १०
व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् ११
न घटाद्घटानिष्पत्तेः १२
व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः १३
अभावाद्भावोत्पत्ति-र्नानुपमृद्य प्रादुर्भावात् १४

व्याघातादप्रयोगः १५
नातीतानागतयोः कार-कशब्दप्रयोगात् १६
न विनष्टेभ्योऽनिष्पत्तेः १७
क्रमनिर्देशादप्रतिषेधः १८
ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् १९
न पुरुषकर्माभावे फलानिष्पत्तेः २०
तत्कारितत्वादहेतुः २१
अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् २२
अनिमित्तनिमित्तत्वान्नानिमित्ततः २३
निमित्तानिमित्तयोरर्थान्तरभावा-दप्रतिषेधः २४
सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् २५
नानित्यतानि-त्यत्वात् २६
तदनित्यत्वमग्नेदार्ह्यं विनाश्यानुविनाशवत् २७
नित्यस्या-प्रत्याख्यानं यथोपलब्धिव्यवस्थानात् २८
सर्वं नित्यम्पञ्चभूतनित्यत्वात् २९
नोत्पत्तिविनाशकारणोपलब्धेः ३०
तल्लक्षणावरोधादप्रतिषेधः ३१
नोत्प-त्तितत्कारणोपलब्धेः ३२
न व्यवस्थानुपपत्तेः ३३
सर्वं पृथग्भावलक्षण-पृथक्त्वात् ३४
नानेकलक्षणैरेकभावनिष्पत्तेः ३५
लक्षणव्यवस्थानादेवा-प्रतिषेधः ३६
सर्वमभावो भावेष्वितरेतराभावसिद्धेः ३७
न स्वभावसि-द्धेर्भावानाम् ३८
न स्वभावसिद्धिरापेक्षिकत्वात् ३९
व्याहतत्वादयुक्तम् ४०
संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ४१
न कारणावयव-भावात् ४२
निरवयवत्वादहेतुः ४३
सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ४४
न सद्यः कालान्तरोपभोग्यत्वात् ४५
कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ४६
प्राङ्निष्पत्तेर्वृक्षफलवत्तत्स्यात् ४७
नासन्न सन्न सदसत्सदसतोर्वैधर्म्यात् ४८
उत्पादव्ययदर्शनात् ४९
बुद्धिसिद्धं तु तदसत् ५०
आश्रयव्यतिरे-काद्वृक्षफलोत्पत्तिवदित्यहेतुः ५१
प्रीतेरात्माश्रयत्वादप्रतिषेधः ५२
न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात् ५३
तत्सम्बन्धात्फलनिष्प-त्तेस्तेषु फलवदुपचारः ५४
विविधबाधनायोगाद्दुःखमेव जन्मोत्पत्तिः ५५
न सुखस्याप्यान्तरालनिष्पत्तेः ५६
बाधनानिर्वृत्तेर्वेदयतः पर्येषणदोषाद-प्रतिषेधः ५७
दुःखविकल्पे सुखाभिमानाच्च ५८
ऋणक्लेशप्रवृत्त्यनुबन्धा-दपवर्गाभावः ५९
प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ६०
समारोपणादात्मन्यप्रतिषेधः ६१
पात्रचयान्तानुपपत्तेश्च फलाभावः ६२
सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववदपवर्गः ६३
न प्रवृत्तिः प्रतिसंधानाय हीन-क्लेशस्य ६४
न क्लेशसंततेः स्वाभाविकत्वात् ६५
प्रागुत्पत्तेरभावानित्य-त्ववत्स्वाभाविकेऽप्यनित्यत्वम् ६६
अणुश्यामतानित्यत्ववद्वा ६७
न संकल्पनिमित्तत्वाच्च रागादीनाम् ६८

Sub Chapter 02

दोषनिमित्तानां तत्वज्ञानादहङ्कारनिवृत्तिः १
दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः २
तन्निमित्तं त्ववयव्यभिमानः ३
विद्याविद्याद्वैविध्यात्संशयः ४
तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ५
वृत्त्यनुपपत्तेरपि तर्हि न संशयः ६
कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ७
तेषु चावृत्तेरवयव्यभावः ८
पृथक्चावयवेभ्योऽवृत्तेः ९
न चावयव्यवयवाः १०
एकस्मिन्भेदाभावा-द्भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ११
अवयवान्तराभावेऽप्यवृत्तेरहेतुः १२
केश-समूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः १३
स्वविषयानतिक्रमेणेन्द्रियस्य पटु-मन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः १४
अवयवावयवि-प्रसङ्गश्चैवमाप्रलयात् १५
न प्रलयोऽणुसद्भावात् १६
परं वा त्रुटेः १७

आकाशव्यतिभेदात्तदनुपपत्तिः १८
आकाशासर्वगतत्वं वा १९
अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः २०
शब्दसंयोगविभवाच्च सर्वगतम् २१
अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः २२
मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः २३
संयोगोपपत्तेश्च २४
अनवस्थाकारित्वा-दनवस्थानुपपत्तेश्चाप्रतिषेधः २५
बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुप-लब्धिस्तन्त्वपकर्षणे
पटसद्भावानुपलब्धिवत्तदनुपलब्धिः २६
व्याहतत्वा-दहेतुः २७
तदाश्रयत्वादपृथग्ग्रहणम् २८
प्रमाणतश्चार्थप्रतिपत्तेः २९
प्रमा-णानुपपत्त्युपपत्तिभ्याम् ३०
स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ३१
मायागन्धर्वनगरमृगतृष्णिकावद्वा ३२
हेत्वभावादसिद्धिः ३३
स्मृति-संकल्पवच्च स्वप्नविषयाभिमानः ३४

मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात्स्व-प्नविषयाभिमानप्रणाशवत् प्रतिबोधे ३५
बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ३६
तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ३७
समाधिविशेषाभ्यासात् ३८
नार्थविशेषप्राबल्यात् ३९
क्षुदादिभिः प्रवर्तनाच्च ४०
पूर्वकृतफला-नुबन्धात्तदुत्पत्तिः ४१
अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ४२
अपव-र्गेऽप्येवं प्रसङ्गः ४३
न निष्पन्नावश्यम्भावित्वात् ४४
तदभावश्चापवर्गे ४५
तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ४६
ज्ञानग्रह-णाभ्यासस्तद्विद्यैश्च सह संवादः ४६
तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थि-भिरनसूयुभिरभ्युपेयात् ४७
प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ४८

त-त्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे वीजप्ररोहसंरक्षणार्थं कण्टकशाखा-
वरणवत् ४९
ताभ्यां विगृह्य कथनम् ५०

## Chapter 05

### Sub Chapter 01

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः १
साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्य-वैधर्म्यसमौ २
गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ३
साध्यदृष्टान्तयोर्धर्मविकल्पा-
दुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ४
किंचित्सा-धर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ५
साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ६
प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वादप्राप्त्यासाधकत्वाच्च प्रा-
प्त्यप्राप्तिसमौ ७
घटादिनिष्पत्तिदर्शनात्पीडने चाव्यभिचारादप्रतिषेधः ८
दृष्टान्तस्य कारणानपदेशात्प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन
प्रसङ्गप्रतिदृष्टान्तसमौ प्रदीपोपादानप्रसङ्गविनिवृत्तिवत्तद्विनिवृत्तिः ९
प्रतिदृष्टान्तहेतुत्वे च नाहेतु-र्दृष्टान्तः १०
प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ११
तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः १२

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नि-त्यानित्यसाधर्म्यात् संशयसमः १३

साधर्म्यात्संशये न संशयो वैधर्म्या-दुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो
नित्यत्वानभ्युपगमाच्च सामान्यस्या-प्रतिषेधः १४
उभयसाधर्म्यात्प्रक्रियासिद्धेः प्रकरणसमः १५
प्रतिपक्षात्प्र-करणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः १६
त्रैकाल्यानुपपत्तेर्हेतो-रहेतुसमः १७
न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः १८
प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः १९
अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः २०
अनुक्त-स्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः २१
एक-धर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेरविशेषसमः २२
क्वचि-त्तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः २३
उभयकारणोपपत्ते-रुपपत्तिसमः २४
उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः २५

निर्दिष्टकारणा-भावेऽप्युपलम्भादुपलब्धिसमः २६
कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः २७
तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः २८
अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः २९
ज्ञानविकल्पानां च भावाभावसंवेद-नादध्यात्मम् ३०
साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ३१
साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसामर्थ्यात् ३२
दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य
चोभयथाभावान्नाविशेषः ३३
नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ३४
प्रतिषेध्ये नित्यम-नित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः ३५
प्रयत्नकार्यानेकत्वा-त्कार्यसमः ३६
कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ३७
प्रति-षेधेऽपि समानो दोषः ३८
सर्वत्रैवम् ३९
प्रतिषेधविप्रतिषेधे प्रति-षेधदोषवद्दोषः ४०
प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोष-प्रसङ्गो मतानुज्ञा
स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषा-
भ्युपगमात्समानो दोषः ४१

Sub Chapter 02

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं
निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणम-
ज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽप-
सिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि १
प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः २
प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ३
प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ४
पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ५
अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ६
प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ७
वर्णक्रमनिर्देशवन्निरर्थकम् ८
परि-षत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ९
पौर्वापर्यायोगाद-प्रतिसम्बद्धार्थमपार्थकम् १०
अवयवविपर्यासवचनमप्राप्तकालम् ११
हीन-मन्यतमेनाप्यवयवेन न्यूनम् १२
हेतूदाहरणाधिकमधिकम् १३
शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् १४
अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम् १५
विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् १६
अविज्ञातं चाज्ञानम् १७
उत्तरस्याप्रतिपत्तिरप्रतिभा १८
कार्य-व्यासङ्गात्कथाविच्छेदो विक्षेपः १९
स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषप्रसङ्गो मतानुज्ञा २०
निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् २१
अनि-ग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः २२
सिद्धान्तम-भ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः २३
हेत्वाभासाश्च यथोक्ताः २४